# अन्ताराष्ट्रिया संगोष्ठी

## (International Seminar)

# संस्कृतसाहित्ये बौद्धपरम्परायाः योगदानम्

## (Contribution of Buddhist tradition to Sanskrit literature)

(30 जनवरी, 2019 तः 31 जनवरी, 2019 पर्यन्तम्)

आयोजकः अध्यक्षश्च

**प्रो. के.बी. सुब्बरायुडुः**

संयोजकौ

**डॉ. कृपाशङ्करशर्मा**

**डॉ. प्रफुल्लगडपालः**

सह-संयोजकः

**डॉ. दिनेशचन्द्रपाण्डेयः**


**साहित्य-विभागः**

**राष्ट्रिय-संस्कृत-संस्थानम्**

(राष्ट्रियमूल्यांकनप्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः,
भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः समविश्वविद्यालयः)

**श्रीरघुनाथ-कीर्ति-परिसरः**

**देवप्रयागः, पौडी-गढवालः, उत्तराखण्डः-249 301**

**01375 266028**

**email-srkcampus@gmail.com**

**www.srkcampus.org**

# ॥ प्रास्ताविकम्॥

**प्रस्तावना—**

संस्कृतवाङ्मये नैकेषु विषयेषु, शास्त्रेषु दर्शनेषु तथा विविधासु विधासु उपविधासु च साहित्यं विरचितं वर्तते। अत्र वैदिकधर्मेण सह बौद्धजैनधर्मयोरपि साहित्यम् उपनिबद्धं वर्तते। विदितमेव यत् जैनाचार्याणां कवीनां च संस्कृतसाहित्यपरम्परायाम् अप्रतिमं योगदानं विद्यते इति। एवमेव नैके बौद्धकवयः आचार्याः च संस्कृतेन साहित्यप्रणयनं कृत्वा संस्कृतवाङ्मयं समेधितवन्तः। बौद्धकवयः विशेषतः भगवतो बुद्धस्य चरितविषये दर्शनविषये च स्व-स्वरचनासु वर्णनं प्रस्तुतवन्तः। वयं बौद्धकाव्यकृतीः भगवतो बुद्धस्य व्यक्तित्वस्य तद्धर्मस्य च साकारं स्वरूपं कथयितुं शक्नुमः; यतोहि एतेषु काव्येषु उभावपि पूर्णतः प्रतिफलिते जाते। यद्यपि शास्त्रं 'कटुकौषधिवत्' भवति, यस्य आस्वादनं साहित्यमाध्यमेन सुकरं भवति। प्रायशः समस्ताः बौद्धकाव्यकृतयः बुद्धविचाराणां सिद्धान्तानां च स्वरूपभूताः सन्ति। बुद्धवचनानां परवर्तिनि संस्कृतसाहित्ये व्यापकः प्रभावः जातः। यद्यपि भगवता बुद्धेन जनभाषायां मागध्यां (पाल्यां) धर्मदेशनाः प्रदत्ताः, किन्तु परवर्तिनः बौद्धकवयः आचार्याः च दार्शनिकतत्त्व-प्रसाराय संस्कृतस्य आश्रयमगृह्णन्। विशेषरूपेण बौद्धधर्मस्य महायानपरम्परा संस्कृतं स्वीचकार। फलतः संस्कृतमाध्यमेन विपुला साहित्यरचना सञ्जाता, बुद्धधर्मस्य प्रचारश्च अभवत्। प्रकारान्तरेण संस्कृतस्य अभिवृद्धये एव कल्पितम्। प्रसङ्गतः बौद्धसंस्कृतसाहित्ये बौद्धराजानां, महापुरुषाणां श्रेष्ठविभूतीनां चापि वर्णनं सञ्जातं वर्तते।

बुद्धानुयायिभिः मनीषीभिः कविभिश्च द्विधा संस्कृतभाषां स्वकाव्यरचनाकर्मणो माध्यमं विधाय साहित्यं विरचितम्—1. विशुद्ध-संस्कृतं, 2. मिश्रित-संस्कृतं च। अत्र एकतः अश्वघोष-शान्तिदेवसदृशाः महान्तः कवयो, दिङ्नाग-धर्मकीर्ति-समाः दार्शनिकाश्च विशुद्ध-संस्कृतेन साहित्यरचनाः अकुर्वन्; अपरतः मिश्रितसंस्कृतेन वैपुल्यसूत्र-जातक-अवदानादि-साहित्यं विरचितमभवत्। अश्वघोषकालीने भारते गृहे-गृहे तस्य रचनानां गानं जायते स्म। हुएनसाङ्गमतानुसारेण अश्वघोषः, आर्यदेवः, नागार्जुनः कुमारलातश्चेति इमे साहित्याकाशस्य 'देदीप्यमानाः चत्वारः सूर्याः' सन्ति, यैः विश्वं प्रकाशितम्। अत्र महाकाव्यानि रूपकाणि गद्यसाहित्यं चम्पूकाव्यानि च रचितानि अभूवन्। बुद्धचरितं, सौन्दरनन्दं, पद्यचूडामणिः, कल्पनामण्डतिका, कप्फिणाभ्युदयं बोधिसत्त्वावदानमाला इत्यादीनि नैकानि काव्यानि अत्र समुपलभ्यन्ते। बौद्धसंस्कृतसाहित्ये तु असंख्याकानि काव्यानि समुपलभ्यन्ते। बौद्धसंस्कृतस्तोत्राणि स्तवाः च अत्यन्तं रम्याः सन्ति। आधुनिकसंस्कृतसाहित्येऽपि पुष्कलमात्रायां काव्यानि रचितानि अभूवन्। अपरत्र मिश्रितसंस्कृतेनापि अतीव मञ्जुलं साहित्यं विरचितमभवत्। इदं मिश्रितसंस्कृतं पालिसंस्कृतमिश्रितत्वात् 'बौद्ध-मिश्रित-संस्कृत-साहित्यम्' (Buddhist Hybrid Sanskrit Literature) इति वैदेशिकैः अनुसन्धातृभिः विद्वद्भिश्च कथितम्। इदं च बौद्धसंस्कृतसाहित्यम् अत्यन्तं विशालं विस्तृतं च वर्तते। अस्य साहित्यस्य उपलब्धिः द्वादश अङ्गेषु प्राप्यते। तद्यथा—

> **सूत्रं गेयं व्याकरणं गाथोदानावदानकम्।**
> **इतिवृत्तकं निदानं वैपुल्यं च सजातकम्।**
> **उपदेशाद्भुतौ धर्मौ द्वादशाङ्गमिदं वचः।।**

बौद्धसंस्कृतकविभिः एकस्मिन् पक्षे स्वकाव्यवीणायां दार्शनिकानि धार्मिकानि च गीतानि झंकृत्य काव्यमर्मज्ञरसिकानां चित्तानि रञ्जितानि; अपरस्मिन् पक्षे साहित्यिक-सांस्कृतिक-ऐतिहासिकादिदृष्ट्या स्वीया यशोदुन्दुभिः अपि सन्निनादिता। अस्मिन् साहित्ये आलङ्कारिकतत्त्वानि स्पष्टतया अवलोकयितुं शक्यते। भारतदेशस्य बहिः सुदूरवर्तिषु देशेष्वपि एतानि द्वादश अङ्गानि आश्रित्य कल्याणमयस्य बौद्धधर्मस्य कीर्तिपताकाम् उत्तोलयित्वा विश्वस्य सम्मुखं सम्यक्सम्बुद्धस्य अनुपमजीवनगाथां, तदुदात्तचरितं लौकिकालौकिकगुणानाम् आदर्शं चोपस्थाप्य बौद्धकवयो भारतमातुः मस्तकं उन्नीतवन्तः। किन्तु, अहो! दुःखमिदं यत् बुद्धोद्भावितं बुद्धधर्ममिव, बौद्धकाव्यकृतयोऽपि अस्यां भारतभूमौ समुचिततया सम्मानभाजः भवितुं नाशक्नुवन्, यस्मात् कारणाद् वयं बौद्धकाव्यकाराणां कवीनां च वचनामृतेभ्यः वञ्चितप्रायाः जाताः। एकम् आर्यमञ्जुश्रीमूलकल्पं विहाय एकोऽपि बौद्धग्रन्थः अस्य देशस्य परिधौ नैव लब्धः। साम्प्रतं यत्किमपि बौद्धसाहित्यं समुपलभ्यते, तस्य सर्वमपि श्रेयः भारतविद्यासमुपासकेभ्यः वैदेशिकविद्वद्भ्यः एव गच्छति। तेषामेव महता प्रयत्नसमुच्चयेन अज्ञानतिमिरविलीनानां बौद्धग्रन्थानां रक्षा भवितुमशक्नोत्, तेष्वपि कतिपयग्रन्थाः एवं प्राकाश्यं गताः। एतेषां ग्रन्थानां प्रकाशताम् आगतेऽपि, एतावत्पर्यन्तं बौद्धसाहित्यस्य धरातले स्वच्छन्दतया प्रवाहमानायाः बौद्धकाव्यमन्दाकिन्याः परमपवित्रस्यामृतवारिणो रसास्वादनस्य सौभाग्यं सहृदयेभ्यः साहित्यसमीक्षकेभ्यः सुलभं न जातम्।

बौद्धपरम्पराः काव्यशास्त्रदृष्ट्या संस्कृतसाहित्याय बहु किमपि नवीनं प्रायच्छत्। शान्तरसस्य प्रादूर्भावः बौद्धपरम्परायाः संस्कृतकाव्यशास्त्रे विशिष्टम् अवदानं वर्तते। नाट्यशास्त्रे अष्टौ रसानाम् एव उल्लेखः वर्तते। यदा बौद्धधर्मसम्बद्धानि काव्यानि रचितानि

अभूवन्, तदा काव्यशास्त्रपरम्परायां शान्तरसस्य विवेचनमारब्धम्। बौद्धपरम्परायाः प्रभावेण खलु प्रतीत्यसमुत्पादस्य सन्दर्भे रसावबोधः कर्तुं शक्यते। एवमेव न्यायपरम्परायामपि बौद्धदर्शनस्य विशिष्टं योगदानं वर्तते; यत् खलु अलङ्कारशास्त्रस्य विकासे सहकारिभूतं सञ्जातम्। महान्तौ आलङ्कारिकौ आचार्यौ भामह-दण्डिनौ बुद्धमतानुयायिनौ आस्तामिति विदुषां विचारो वर्तते। मम्मटादयः आचार्याः बौद्धदर्शनस्य सन्दर्भे स्वीयां चिन्तनसरणिं सारयन् शब्दशक्तीनां विवेचनं प्रास्तौत्। अस्यां च परम्परायां सुबोधालङ्कारः स्वाभाषालङ्कारश्च च अलङ्कारग्रन्थौ लभ्येते। एवमेव छन्दोरत्नाकरस्य छन्दःशास्त्रीय-ग्रन्थस्यापि समुपलब्धिः जायते।

अपि च, विविधेषु कालेषु अस्य बौद्धमिश्रितसंस्कृतसाहित्यस्य भोटचीनीभाषयोः अनुवादोऽपि सञ्जातः। तयोः भोटचीनीभाषयोः समुपलब्धस्य साहित्यस्य संस्कृतभावानुवादः विद्वद्भिः विहितः; येन अस्माकं हस्तच्युता सम्पत् पुनः हस्तागतमणिर्जाता। यथा खलु महाकविना अश्वघोषेण विरचितस्य बुद्धचरितस्य पूर्वार्द्धभागस्य कैश्चित् खण्डितश्लोकैः सहितः 14 सर्गात्मकः उत्तरार्द्धभागः अनेनैव विधिना महता प्रयत्नेन संस्कृतेन विरचितः। जान्स्टननामकेन वैदेशिकेन विदुषा भोटचीनीभाषयोः आंग्लानुवादं कृत्वा प्रकाशितः, यस्य आचार्येण सूर्यनारायणचौधरिणा हिन्द्यनुवादो विहितः। ततश्च विशिष्टाः संस्कृतविद्वांसः अस्य हिन्द्यनुवादस्य संस्कृतापद्यानुवादम् अकुर्वन्। एतादृशाः सहस्र-संख्याकाः ग्रन्थाः भोटचीनीभाषयोः लभ्यन्ते। तेषां संस्कृतभाषायां पुनः छायानुवादः आवश्यको वर्तते।

संस्कृत-काव्यशास्त्रदृष्ट्या यदा वयं बौद्धकाव्यानां साहित्यस्य वा अनुशीलनं समीक्षणं च कुर्मः, तदा ज्ञायते यत् साहित्यजगतः अन्यकृतीनामिव एतासु अपि समेऽपि काव्यगुणाः समुपलभ्यन्ते इति। रस-छन्दः-अलङ्कार-गुणादिदृष्टिभिः इदं बौद्धसंस्कृतकाव्यं श्रेष्ठकाव्यं सिद्ध्यति इति। अनेनैव कारणेन विश्वसाहित्ये एतासां बौद्धकृतीनां महत्त्वपूर्णं स्थानं वर्तते। भगवद्बुद्धदेशनाः सम्पूर्णं विश्वसमाजम् अन्ताराष्ट्रियस्तरे एकस्मिन् सूत्रे बध्नन्ति। अतः इदं बौद्धसाहित्यं 'विश्वसाहित्यम्' इति आख्यामर्हति।

इत्थं सहस्रशः ग्रन्थाः अनुवाद-अनुसन्धान-समालोचनानाम् अभावे उपेक्षिताः सन्ति। एतेषाम् अनुवाद-अनुसन्धनाभ्यां नूनं भारतीयस्य इतिहासस्य संस्कृतेश्च अनुद्घाटिताः पक्षाः समधिकं स्पष्टतराः भविष्यन्ति। अनेन च अस्मिन् विषये नैके नूतनाः साहित्यविषयकाः आयामाः समुद्घाटिताः भविष्यन्तीति। एतादृशमेव महान्तं कार्यं साधयितुं विचारान् उपस्थापयितुम् वर्द्धयितुं च इयम् अन्ताराष्ट्रिया सङ्गोष्ठी समायोज्यते भारतशासनस्य मानवसंसाधनविकासमन्त्रालयान्तर्गतस्य राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागेन। 30-31 जनवरी, 2019 इत्येतस्मिन् काले इयम् अन्ताराष्ट्रिया सङ्गोष्ठी परिसरे समायोजिता भविष्यति।

ध्यातव्यमस्ति यत् राष्ट्रियसंस्कृतसंस्थानं संस्कृतेन सह पालि-प्राकृतभाषयोः अध्ययनाय, अनुसन्धनाय संवर्धनाय च कृतसङ्कल्पं वर्तते। साम्प्रतं, संस्थानं पालि-प्राकृतभाषयोः साहित्यस्य संस्कृतच्छायया सह हिन्दी-आंग्लानुवादमपि कुर्वद् वर्तते। अस्मिन् क्रमे भावयामः यद् इयं राष्ट्रिया सङ्गोष्ठी नूनं नूतनां कामपि विशिष्टां सम्भावनाम् उद्भावयिष्यतीति। बौद्ध-संस्कृत-साहित्यस्य अनुवाद-अनुसन्धान-विमर्शादिभिः नूनं भारतस्य गौरवं सर्वत्र प्रसरिष्यतीति विश्वसिमः।



**सूचना–**

बौद्ध-संस्कृत-साहित्यस्य निक्षेपणं http://www.dsbcproject.org इति वेबसाईट-मध्ये कृतं वर्तते, एतदर्थं ततः काव्यानि दृष्टुं शक्यन्ते।

दरभंगास्थ-मिथिलाविद्यापीठतः बौद्ध-संस्कृत-ग्रन्थावल्याः अन्तर्गतं बौद्धसंस्कृतग्रन्थानां प्रकाशनं सञ्जातं वर्तते। ततः अपि अपेक्षिता सामग्री दृष्टुं शक्यते।

# ॥ सत्राणि॥

काव्य-खण्डः

## संस्कृतसाहित्यपरम्परायां बौद्धसंस्कृतसाहित्यस्य स्थानम्

### विशुद्ध-संस्कृत-साहित्यम्

1. पद्यकाव्यानि

अश्वघोषस्य बुद्धचरितं सौन्दरनन्दं च, बुद्धघोषस्य पद्यचूडामणिः (सिद्धार्थचरितम्), शिवस्वामिनः कप्फिणाभ्युदयम्, क्षेमेन्द्रस्य बोधिसत्त्वावदानमाला

2. गद्यसाहित्यम्

बौद्ध-संस्कृत-साहित्ये गद्यसाहित्यं प्राचुर्येण समुपलभ्यते।

3. चम्पूसाहित्यम्

कुमारलातस्य कल्पनामण्डतिका, आर्यशूरस्य जातकमाला दिव्यावदानं च

4. रूपकाणि उपरूपकाणि च

अश्वघोषस्य उर्वशीवियोगं सारिपुत्रप्रकरणं च (विलुप्ते), हर्षवर्धनस्य नागानन्दम्, नालन्दादहनम्

### बौद्ध-मिश्रित-संस्कृतसाहित्यम्

1. नव महायानसूत्राणि

अष्टसाहस्रिका प्रज्ञापारमिता, सद्धर्मपुण्डरीकसूत्रं, ललितविस्तरः, लंकावतार-सूत्रं, सुवर्णप्रभाससूत्रं, गण्डव्यूहसूत्रं, तथागतगुह्यकसूत्रं, समाधिराजसूत्रं दशभूमीश्वरसूत्रं च

2. अवदानसाहित्यम्

बोधिसत्त्वावदानमाला (जातकमाला), अवदानशतकं, अवदानकल्पलता, दिव्यावदानं, द्वात्रिंशत्यवदानमाला, कल्पद्रुमावदानं, रत्नावदानमाला, विचित्रकर्णिकावदानमाला, चित्रितकर्णिकावदानं, भद्रकल्पावदानं इत्यादि-अवदान-साहित्यम्।

3. त्रिपिटकीयं बौद्धसंस्कृतसाहित्यम्

### आधुनिकबौद्धसंस्कृतसाहित्यम्

1. काव्यानि—

सत्यव्रतशास्त्रिणः श्रीबोधिसत्त्वचरितम्; आचार्यशान्तिभिक्षुशास्त्रिणः बुद्धविजयकाव्यं, बुद्धोदयकाव्यम् अशोकाभ्युदयकाव्यं च; पं. ओगेटि परीक्षित् शर्मणः यशोधरामहाकाव्यम्; ओसकेरे-नागप्पशास्त्रिणः श्रीमद्बुद्धभागवतम्; डॉ. प्रफुल्लगडपालस्य महाबोधिद्रुमविजयं भदन्तसदानन्दचरितामृतं च

2. रूपकाणि उपरूपकाणि च—

डा. वीरेन्द्रकुमारभट्टाचार्यस्य सिद्धार्थचरितम्; डा. चन्द्रभानुत्रिपाठिनः सुजाता; डा. मिथिलेशकुमारीमिश्रायाः आम्रपाली; देवर्षि कलानाथशास्त्रिणः महाभिनिष्क्रमणम्; रामज्युपाध्यायस्य नन्दगौतमीयम् अशोकविजयं च; रामकुमारवर्मणः (प्रो. राजेन्द्रमिश्रानूदितं च) विजयपर्व; डा. नारायणशास्त्रिणः अशोकस्य पराजयः, कुणालस्य कुलीनता च; धर्मानन्दकोसम्बिनः (डा. प्रफुल्लगडपालानूदितश्च) बोधिसत्त्वः

3. गद्यसाहित्यम् (उपन्यासादि)—

1. 'अशोकन् पुरनाट्टुकरा'ख्येन अनूदितोपन्यासः महाप्रस्थानम्; 2. डा. एल्. सुलोचनादेव्या अनूदितोपन्यासः सिद्धार्थः, 3. भरतसिंहोपाध्यायस्य महाबुद्धवत्थु-ग्रन्थस्य प्रो. संघसेनसिंहेन मधुसूदनशर्मणश्च संस्कृतेन लिखिता भूमिका; 4. करुणासमुद्रः गौतमबुद्धः

4. स्फुटकाव्यानि

कवि/आचार्य-खण्डः

## संस्कृतसाहित्यपरम्परायां बौद्धसंस्कृतकवीनां योगदानम्

1. महाकवयः

बुद्धचरितकारः सौन्दरनन्दकारश्च अश्वघोषः; पद्यचूडामणिकारः (सिद्धार्थचरितकारः) बुद्धघोषः; कल्पनामण्डतिकाकारः कुमारलातः; कप्फिणाभ्युदयकारः शिवस्वामी; बोधिसत्त्वावदानमालाकारः क्षेमेन्द्रः अन्ये च कवयः।

2. गद्यकाराः

बौद्ध-संस्कृत-साहित्ये गद्यसाहित्यकाराणां साहित्यं प्राचुर्येण समुपलभ्यते।

3. रूपकाकाराः

मृच्छकटिककारः शूद्रकः; नागानन्दकारः हर्षवर्धनः

4. अल्पज्ञाताः बौद्धकवयः

राजा धर्माशोकः (राजतरङ्गिण्याम् उल्लेखः) अन्ये च कवयः।

स्तोत्र/स्तवः/-सुभाषित/नीति/-पत्र/लेख-खण्डः

## संस्कृतसाहित्यपरम्परायां स्तोत्र-सुभाषित-पत्रकाव्यानि

स्तोत्रकाराः

बुद्धगण्डीस्तवकारः अश्वघोषः, हेतुस्तवादि-स्तोत्रकारः मातृचेटः, चतुःस्तवकारः नागार्जुनः, बुद्धनिर्वाणस्तोत्रकारः धर्मकीर्तिः, स्रग्धरा-स्तोत्रकारः सर्वज्ञमित्रः, गण्डीस्तवकारः आर्यदेवः, मध्यमकशास्त्र-स्तुतिकारः चन्द्रकीर्तिः, सुप्रभातस्तोत्रकारः हर्षवर्धनः, अवलोकिते-श्वरस्तवकारा भिक्षुणी चन्द्रकान्ता, करुणास्तवकारः बन्धुदत्ताचार्यः, तारास्तुतिकारः चन्द्रदासः—अन्ये स्तोत्रकाराः स्तवकाराश्च।

सुभाषितकाराः/नीतिकाराः

शतगाथाकारः वररुचिः, शिष्यलेखाधर्मभाष्यकारः चन्द्रगोमी, बोधिचर्यावतारकारः शान्तिदेवः, सुभाषितरत्नकारण्डककारः, नीतिशास्त्रकारः मसूराक्षः च

पत्र/लेखादि-साहित्यम्

सुहल्लेखकारः नागार्जुनः, महाराज-कनिक-लेखकारः मातृचेटः, शिष्यलेखकारः चन्द्रगोमी

- स्तोत्र/स्तवः/-सुभाषित/नीति/-पत्र/लेखादीनां वैशिष्ट्यं महत्त्वं च
- तिब्बतीय-चीनभाषयोः अनूदितानि संस्कृतपत्राणि लेखाश्च

दार्शनिककाव्य-खण्डः

## संस्कृतसाहित्यपरम्परायां बौद्धदार्शनिककाव्यानि तत्प्रणेतारश्च

दार्शनिककाव्यप्रणेतारः कवयः—

1. दार्शनिककाव्यानां परिचयः—

बुद्धपालितकृता माध्यमिककारिकायाः 'आकुतोभया' इति टीका, भावविवेकस्य माध्यमिककारिका व्याख्या, शान्तरक्षितस्य तत्वसंग्रहः, मैत्रेयनाथस्य महायानसूत्रालङ्कारः अभिसमयालङ्कारकारिका च, वसुबन्धुकृतः अभिधर्मकोशः, दिङ्नागस्य प्रमाणसमुच्चयः च।

2. दार्शनिककवीनां परिचयः—

अश्वघोषः, बुद्धपालितः, भावविवेकः, शान्तिदेवः, शान्तरक्षितः, आर्यः असङ्गः, वसुबन्धुः, संघभद्रः, दिङ्नागः, शङ्करस्वामी, धर्मपालः, धर्मकीर्तिः चन्द्रगोमी च।

3. दार्शनिकग्रन्थेषु काव्यतत्त्वानि

4. दार्शनिककाव्यानां वैशिष्ट्यम्

**विशेषः—विद्वांसः अस्याः संगोष्ठ्या मुख्यविषय-उपविषयसम्बद्धानन्यान् विषयानपि आधृत्य शोधपत्राणि प्रस्तोतुं प्रभवन्ति।**

काव्यशास्त्र-खण्डः

संस्कृतकाव्यशास्त्रपरम्परायां बौद्धसंस्कृतकाव्यशास्त्रिणां योगदानम्

काव्यशास्त्रिणः आचार्याः

काव्यालंकारकारः भामहः, काव्यादर्शकारः दण्डी, रामशर्मा, मेधावी, धर्मकीर्तिः च।

बौद्धसिद्धान्तानां काव्यशास्त्रे प्रभावः

मध्यमा प्रतिपद् (यथाभूतप्रत्यवेक्षा); वस्तुध्वनिः; बुद्धमतेन शान्तरसस्य प्रादुर्भावः; प्रतीत्यसमुत्पादसन्दर्भे रसावबोधः च।

छन्द-अलङ्कार-खण्डः

बौद्धसंस्कृतपरम्परायां रचिताः छन्दः-अलङ्कारग्रन्थाः

1. कलिकालसर्वज्ञरत्नाकरशान्तिपाद-प्रणीतः छन्दोरत्नाकरः
2. संघरक्षितकृतः सुबोधालंकारः
3. शिलामेघसेनकृतः स्वभाषालंकारः (सियबसलकुर)
4. बौद्ध-काव्यशास्त्रग्रन्थानां वैशिष्ट्यं महत्त्वं च

कोष-खण्डः

बौद्धसंस्कृतपरम्परायां रचिताः कोषग्रन्थाः

1. शब्दकोषाः

अमरसिंहस्य अमरकोषः, महाव्युत्पत्तिः, शब्दभेदप्रकाशः, विश्वप्रकाशः च

2. शास्त्रकोषाः

वसुबन्धोः अभिधर्मकोशः, नागार्जुनस्य धर्मसंग्रहः, धर्मसमुच्चयः

टीका-व्याख्यादि-खण्डः

बौद्धसंस्कृतपरम्परायां रचितं टीका-व्याख्यादिसाहित्यम्

1. दण्डिनः काव्यादर्शस्य टीकाकारः रत्नश्रीज्ञानः
2. सद्धर्मपुण्डरीकटीका
3. सूत्रालङ्कारवृत्ति-भाष्यम्
4. प्रमाणसमुच्चयवृत्तिः
5. बौद्धसंस्कृतव्याकरणग्रन्थानां टीकाः
6. अन्यत् टीका-व्याख्या-भाष्यादिसाहित्यम्

अनुवाद-खण्डः

बौद्धविद्वद्भिः संस्कृतग्रन्थानां तिब्बतीय-चीन्यादिभाषासु अनुवादः

1. तिब्बतदेशीयाः विद्वांसः अनुवादकाः
2. चीनदेशीयाः विद्वांसः अनुवादकाः
3. भारतीयाः विद्वांसः अनुवादकाः
4. विविधदेशीयाः विद्वांसः अनुवादकाः

पालिसाहित्य-खण्डः

पालिसाहित्यस्य काव्यशास्त्रीयं मूल्याङ्कनम्

1. पद्यमय-साहित्यम्

1. तिपिटकान्तर्गतं पद्यसाहित्यम्

2. अनागतवंसो, तेलकटाहगाथा, जिनालंकारो, जिनचरितं, पज्जमधु, सद्धम्मोपायनं, बुद्धालङ्कारो, पञ्चगतिदीपनं लोकप्पदीपसारो (लोकदीपसारो) च

3. महावंस-दीपवंसादि-वंस-साहित्यं

2. गद्य-साहित्यम्

1. तिपिटकान्तर्गतस्य गद्यसाहित्यम्

2. सहस्सवत्थुप्पकरणं, राजाधिराजविलासिनी

3. चम्पू-साहित्यम्

1. तिपिटकान्तर्गतस्य पद्यमयं चम्पूसाहित्यम्

2. रसवाहिनी

4. पालि-साहित्यस्य साहित्यशास्त्रीयं मूल्याङ्कनम्

1. पालिछन्दःशास्त्र-ग्रन्थः–'वुत्तोदयं' (वृत्तोदयम्)

2. पालि-अलंकारशास्त्र-ग्रन्थः–'सुबोधालंकारो'

3. पालिकोशसाहित्यम्–

मोग्गलानस्स 'अभिधानप्पदीपिका' (मोग्गलायनस्य अभिधान-प्रदीपिका), सद्धम्मकीत्तिस्स 'एकक्खरकोसो' (सद्धर्मकीर्तेः एकाक्षरकोशः)

बौद्धमतसम्बद्धपौराणिकसाहित्य-खण्डः

बौद्धसंस्कृतपरम्परायां रचितं टीका-व्याख्यादिसाहित्यम्

1. पुराणेषु बुद्धमतसम्बद्धाः सन्दर्भाः

1. पुराणेषु बुद्धवर्णनम्; 2. पुराणेषु अशोकादीनां राज्ञां वर्णनम्; 3. पुराणेषु बौद्धधम्मसम्बद्धाः घटनाः; 4. महाभारते बौद्धधम्मसम्बद्धासु घटनासु विमर्शः; 5. रामायणे बौद्धधम्मसम्बद्धासु घटनासु विमर्शः

2. क्षेमेन्द्रस्य दशावतारचरितम्

3. जयदेवस्य अष्टपद्यां बुद्धवर्णनम्

विविध-खण्डः

बौद्धविदुषां विविधशास्त्रेषु योगदानम्

1. बौद्धसंस्कृतशास्त्रप्रणेतारः आचार्याः
2. व्याकरण-ज्यौतिषादि-शास्त्र-प्रणेतारः आचार्याः
3. अभिलेखीय-बौद्धसंस्कृत-साहित्यम्
4. बौद्धसंस्कृतसाहित्यसंवर्धने आधुनिकविदुषां योगदानम्



## संगोष्ठीसम्बद्धा आवश्यका निर्देशाः सूचनाश्च

1. संगोष्ठी-दिनाङ्कः 30-31, जनवरी, 2019
2. शोधपत्राणि संस्कृतम्/हिन्दी/आङ्गलम् इति तिसृभिः भाषाभिः प्रस्तोतुं शक्यन्ते।
3. शोधपत्रसारांशः शोधपत्राणि च prafullgadpal@gmail.com इति ई-मेल-सङ्केतेन प्रेषयितुं शक्यन्ते।
4. शोधपत्राणि यूनिकोड/कृतिदेव/वाक्मैन चाणक्यादिफांटद्वारा उट्टङ्कितानि भवितुमर्हन्ति।
5. शोधपत्रसारांश/शोधपत्रप्रेषणस्य अन्तिमा तिथिः - 10-01-2019
6. संगोष्ठ्यामस्यां भागग्रहणाय पञ्जीकरणं निश्शुल्कं भविष्यति।
7. समेषां प्रतिभागिनां भोजनावासादिव्यवस्थाः परिसरेण कल्पयिष्यन्ते।
8. यात्राव्ययः स्वयं वोढव्यो भविष्यति।



योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्


संयोजकौ

**डा. कृपाशङ्करशर्म-डा. प्रफुल्लगडपालौ**

अन्ताराष्ट्रियसङ्गोष्ठी (साहित्यविभागः)

राष्ट्रियसंस्कृतसंस्थानम् (समविश्वविद्यालयः)

**श्रीरघुनाथकीर्तिपरिसरः**

देवप्रयागः, पौडीगढवालः, उत्तराखण्डः - 249 301

दूरवाणी-94365 44326, 81264 85505

ई-मेल-prafullgadpal@gmail.com

अध्यक्षः आयोजकश्च

**प्रो. के.बी.सुब्बरायुडुः**

प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम् (समविश्वविद्यालयः)

**श्रीरघुनाथकीर्तिपरिसरः**

देवप्रयागः, पौडीगढवालः, उत्तराखण्डः - 249 301

दूरवाणी-01375 266028

ई-मेल-srkcampus@gmail.com